# ॥ विष्णुसूक्तम् ॥

ॐ विष्णो॒र्नुकं॑ वी॒र्या॑णि॒ प्रवो॑चं॒ यः पार्थि॑वानि विम॒मे रजा॑ꣳसि॒ यो अस्क॑भाय॒दुत्त॑रꣳ स॒धस्थं॑ विचक्रमा॒णस्त्रे॒धोरु॑गा॒यो विष्णो॑र॒राट॑मसि॒ विष्णोः᳚ पृ॒ष्ठम॑सि॒ विष्णोः॒ श्नप्त्रे॑स्थो॒ विष्णो॒स्स्यूर॑सि॒ विष्णो᳚र्ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा ॥

तद॑स्य प्रि॒यम॒भिपाथो॑ अश्याम् । नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति । उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था । विष्णो᳚ः प॒दे प॑र॒मे मध्व॒ उत्स॑ः । प्रतद्विष्णु॑स्स्तवते वी॒र्या॑य । मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः । यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेषु । अधि॑क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा᳚ । प॒रो मात्र॑या त॒नुवा॑ वृधान । न ते॑ महि॒त्वमन्व॑श्नुवन्ति ॥

उ॒भे ते॑ वि॒द्म रज॑सि पृथि॒व्या विष्णो॑ दे॒वत्वम् । प॒र॒मस्य॑ वित्से । विच॑क्रमे पृथि॒वीमे॒ष ए॒ताम् । क्षेत्रा॑य॒ विष्णु॒र्मनु॑षे दश॒स्यन् । ध्रु॒वासो॑ अस्य की॒रयो॒ जना॑सः ।
उ॒रु॒क्षि॒तिꣳ सु॒जनि॑माचकार । विच॑क्रमे श॒तर्च॑सं महि॒त्वा । प्रवि॑ष्णुरस्तु त॒वस॒स्तवी॑यान् ।
त्वे॒षꣳह्य॑स्य॒ स्थवि॑रस्य॒ नाम॑ ॥

अतो॑ दे॒वा अ॑वन्तु॒नो॒ यतो॒ विष्णु॑र्विचक्र॒मे । पृ॒थि॒व्यास्स॒प्त धाम॑भिः । इ॒दं विष्णु॒र्विच॑क्रमे त्रे॒धा निद॑धे प॒दम् । समू॑ढमस्य पाꣳसु॒रे । त्रीणि॑ प॒दा विच॑क्र॒मे॒ विष्णु॑र्गो॒पा अदा᳚भ्यः ।
तत॒ो धर्मा॑णि धा॒रय॑न् । विष्णो॒ः कर्मा॑णि पश्यत॒ यतो᳚ व्र॒तानि॑ पस्प॒शे । इन्द्र॑स्य॒ युज्य॒स्सखा᳚ ॥

तद्विष्णो᳚ः पर॒मं प॒दꣳ सदा॑ पश्यन्ति सू॒रय॑ः । दि॒वीव॒ चक्षु॒रात॑तम् । तद्विप्रा॑सो विप॒न्यवो॑ जागृ॒वाꣳ स॒स्समि॑न्धते । विष्णो॒र्यत्प॑र॒मं प॒दम् । पर्या᳚प्त्या अन॑न्तराया॒य सर्व॑स्तोमोऽति रा॒त्र उ॒त्तम मह॑र्भवति॒ सर्व॒स्याप्त्यै॒ सर्व॑स्य॒ जित्यै॒ सर्व॑मे॒व तेना᳚प्नोति॒ सर्वं॑ जयति ॥

॥ ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

Please send corrections to sanskrit@cheerful.com
Last updated July 3, 2000